अध्याय
15

छन्द एवं अलंकार

छन्द शब्द का मुख्य अर्थ बन्धन है। गति, तुक, मात्रा, विराम आदि नियमों पर आधारित काव्य रचना को छन्द कहा जाता है तथा काव्य की शोभा बढ़ाने वाले तत्त्वों को अलंकार कहते हैं अर्थात् जिस माध्यम से काव्य की शोभा में वृद्धि होती है, उसे अलंकार का नाम दिया जाता है।

छन्द परिचयः

कस्यापि काव्यस्य वांछित उपादान सगुणं, दोषरहितं एवं अलंकृत शब्दार्थं मन्यते। गद्य एवं पद्य काव्यस्य कृते ऐते उपादानाः अपेक्षिताः सन्ति। परन्तु पद्य काव्यस्य कृते एकः अन्य उपादानमपि अनिवार्यतः अपेक्षितं मन्यते, यस्य विना पद्य काव्यं भवितुं न शक्नोति। सोऽस्ति 'छन्द'। पद्य काव्ये उपरोक्त काव्य गुणानां अतिरिक्त मात्रा, वर्ण संख्या, विराम अथवा यति, लयबद्धतां इत्यादयस्य आवश्यकता भवति। इति छन्द नियम! कथ्यते। अतः सप्ष्टम् अस्ति यत् पद्य रचनायै कृते छन्द शास्त्रस्य वर्ण-मात्रा इत्यादि विषयक नियमानां पालनं अत्यावश्यकं वर्तते। छन्द शास्त्रस्य आचार्येषु "अचार्य पिङ्गलस्य'' नाम सर्वप्रथम गणयते। छन्दशास्त्रस्य सर्वप्रथम ग्रन्थ अचार्य पिङ्गलकृत 'छन्दसूत्रं' प्राप्यते।

छन्दानां वर्णनं

पाठ्यक्रमानुसारं अत्र छन्दानां वर्णनं प्रस्तूयते

आर्या छन्दः

लक्षणम्

यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थ के पञ्चदश साऽऽर्या।।

यस्मिन् मात्रिकवृत्ते प्रथमे पादे द्वाद्वशमात्राः, द्वितीये पादे अष्टादशमात्राः, तृतीये पादे द्वादशमात्राः, चतुर्थे च पञ्चदशमात्राः भवन्ति, तत्र आर्या जातिर्नामिकं मात्रिकं वृत्तं भवति।

उदाहरणम्

आपरितोषाद् विदुषाम्
न साधु मन्ये प्रयोग विज्ञानम्।
बलवदपि शिक्षिताना
मात्मन्य प्रत्ययं चेतः।।

अत्र प्रथमे तृतीये च चरणे द्वादशमात्राः, द्वितीये अष्टादशमात्राः, चतुर्थे च पञ्चदशमात्राः सन्ति। स्पष्टमिदमार्याछन्दस उदाहरणमस्ति।

इस अध्याय में

- *छन्द परिचयः*
- *छन्दानां वर्णनं*
- *अलंकार*
- *अलंकाराणां वर्णनं*

अनुष्टुप् छन्दः

लक्षणम्

श्लोके षष्ठं गुरुज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।

अस्मिन् वृत्ते सर्वत्र सर्वेषु चरणेषु पञ्चममक्षरं लघु भवति, षष्ठमक्षरं गुरू भवति, द्वितीय-चरणयोः सप्तममक्षरं लघु भवति, प्रथम-तृतीय चरणयोश्च सप्तममक्षरं गुरु भवति, शेषेषु वर्णेषु लघुत्वगुरुत्वयोर्नियमो नास्ति। इदमेव अष्टाक्षरात्मकं पद्यं श्लोकश्चेति कथ्यते। इदञ्च विषमवृत्तेषु गणयते।

उदाहरणम्

अतः परीक्ष्य कर्त्तव्यं, विशेषात् संगतं रहः।
अज्ञात हृदयेष्वेवं, वैरी भवति सौहृदम्।।

अत्र सर्वेषु चरणेषु षष्ठमक्षरं गुरु पञ्चमाश्ररंचलघु भवति। द्वितीय चरणयोः सप्तमक्षरं लघु, प्रथम तृतीय चरणयोश्च सप्तममक्षरं गुरु भवति। अतो हि अनुष्टुप् नामकं विषमवृत्तम्।

इन्द्रवज्रा छन्दः

लक्षणम्

"स्यादिन्द्रवज्रा यदि तौ जगौ गः।"
यस्य चतुर्षु पादेषु तौ तगणः, तगणः, जगौ जगणः
गुरुद्वयं च भवेत्तदेव इन्द्रवज्रा नाम वृत्तं स्यात्।
वृत्तमिदमेकादशाक्षरावृत्तिर्भवति त्रिष्टुप् -जातिभेदेषु
समं गुणवृत्तमिदं बोध्यम्।

उदाहरणम्

अर्थो हि कन्या परकीय एव
तमाद्य संप्रेष्य परिग्रहीतुः।
जातोमयामंविशदः प्रकामं
प्रत्यर्पि तन्यास इवान्तरात्मा।।

अत्र सर्वेषु पादेषु क्रमानुसारं 'तगण-तगण-जगण-गुरु-गुरु' इति गणव्यवस्था वर्तते। प्रथमे चरणे पर्यन्ते यद्यपि लघुवर्णोऽस्ति, परं 'पदान्तस्यं विकल्पेन गुरु' इति नियमेन तस्यापि गुरुत्वं मन्यते।

उपेन्द्रवज्रा छन्दः

लक्षणम्

"उपेन्द्रवज्रा जतजास्ततो गौ।"

यदि सर्वेषु चरणेषु क्रमानुसारं जगणः, तगणः, जगणः, ततश्च गौ गुरुद्वयं चेति भवेत्, तदा तद् उपेन्द्रवज्रा नाम वृत्तं कथ्यते। इदमपि एकादशाक्षरात्मकं वृत्तमस्ति।

उदाहरणम्

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखाः त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वममदेव देवः।।

अत्र सर्वेषु चरणेषु क्रमानुसारं जगण-तगण-जगण-गुरुगुरु इति एकादशवर्णयोजनमस्ति। 'त्वमेव' 'श्रमेण' चेति पदान्ते लघुरपि विकल्पनियमेन गरु मन्यते।

वसन्ततिलका छन्दः

लक्षणम्

"ज्ञेया वसन्ततिलका तभजा जगौ गः।"

यस्य चतुर्षु चरणेषु तभजाः तगणः भगणः जगणश्च, जगौ जगणश्च गुरुश्च ततोः गः गुरुवर्णौ भवति, तत् वसन्ततिलकं वा नाम वृत्तं मन्यते।

उदाहरणम्

यात्येक तोऽस्तशि खरपं तिरोषधीना
माविष्कृतोऽरुणपुरः सर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु।।

अत्र सर्वेषु चरणेषु तगण-भगण-जगण-जगण क्रमेण चतुर्दशअक्षरात्मकं ग्रन्थनं वर्तते, अतो हि वसन्ततिलका नामकं वृत्तम्।

उपजाति छन्दः

लक्षणम्

अनन्तरोदीरिताक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु, वदन्ति जातिष्विदमेव नाम।।

यदीयौ यस्य वृत्तस्य सम्बन्धिनौ पादौ अनन्तरं प्रागेव उदीरितयोः इन्द्रवज्रोपेन्द्रवज्रयोः लक्ष्मभाजौ गण-वर्णचिह्न-भाजौ स्याताम्, ताः उपजातय इति नामकानि वृत्तानि भवन्ति। इत्थमेवं प्रकारेण अन्यासु इतरास्वपि मिश्रितासु समगणवृत्तेषु इदमेव नाम उपजातिरिति नाम वृत्तं वदन्ति बुधाः कथ्यन्ति।

उदाहरणम्

शम प्रधानेषु तपोधनेषु
गूढं हि दाघत्मकमस्ति तेजः।
स्पर्शानुकूला अपि चन्द्रकान्ता
स्वदन्तेजोऽभिभवाद् वमन्ति।।

अत्र प्रथमे चरणे उपेन्द्रवज्रा, द्वितीये चरणे इन्द्रवज्रा वृत्तमस्ति, तथैव तृतीये इन्द्रवज्रा, चतुर्थे चरणे चोपेन्द्रवज्रा वृत्तमस्ति। अनयोः सम्मिश्रणेन उपजातिवृत्तम।

वंशस्थ छन्दः

लक्षणम्

"जतौ तु वंशस्थमुदीरितं जरौ।"

यत्र चतुर्षु पादेषु क्रमेण जतौ-जगणतगणौ जरौ-जगणरगणौ च भवेताम् तत्र द्वादशाक्षरात्मकं वंशस्थनामकं वृत्तं भवति।

उदाहरणम्

तथा समक्षं दहतामनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सैभाग्यफला हिं चारुता।।

अत्र सर्वेषु चरणेषु जगण-तगण-रगणक्रमेण द्वादशवर्णात्मकं ग्रन्थनं वर्तते, अतो हि वंशस्थविलं नामकं वृत्तम।

द्रुतविलम्बित छन्दः

लक्षणम्

"द्रुतविलम्बितमाह नभौ भरौ"।

यस्य चतुर्षु चरणेषु नभौ नगणश्च भगणश्च, भरौ भगणश्च रगणश्च भवेत्, तद् द्रुतविलम्बितं नाम वृत्तं भवति।

उदाहरणम्

नवपलाशपलाशवनं पुर
स्फुटपरागपरागतपंकजम्।
मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोहरैः।।

अत्र सर्वेषु चरणेषु नगण-भगण-भगण-रगण क्रमेण भवति। अतोहि द्रुतविलम्बितं नामकं वृत्तम।

शालिनी छन्दः

लक्षणम्

"मात्तौ गौ चेच्छालिनी वेदलोकैः।"

यस्य चतुर्षु पादेषु मात्तौ भगणात् परं तौ तगणश्च तगणश्च, गौ गुरुश्च गुरुश्च गुरुद्वयं चेति भवेत्, तदेव शालिनी नाम वृत्तं भवति। अत्र वेदलोकैः चतुर्भिः सप्तभिश्च वर्णेर्यतिर्भवति।

उदाहरणम्

सानिन्दन्तिस्वानि भाग्यानि बाला
बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता।
स्त्रीसंस्थानं चाप्सरस्तीर्थमारा
दुत्क्षिप्यैनां ज्योतिरेकं जगाम।।

अत्र सर्वेषु पादेषु मगण-तगण-तगण क्रमेण भवति अतो हि शालिनी नामकं वृत्तम।

मालिनी छन्दः

लक्षणम्

"ननमयययुतेयं मालिनी भौगिलोकैः।"

यस्य चतुर्षु पादेषु नवमययुता नगणः नगणश्च, मगण, यगणः यगणश्च इति क्रमेण पञ्चशवर्णाः भवन्ति, भोगिलोकैः अष्टभिः सप्तभिश्च वर्णैर्यति-र्भवति, इयं वर्णयोजना मालिनी नाम वृत्तं मन्यते।

उदाहरणम्

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो
र्दयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै
स्त्वमपि कुसुमबाणान् वज्रसारिकरोषि।।

अत्र चतुर्षु पादेषु ननमययगणानां योजनया अष्टभिः सप्तभिश्च यतिनियमेन मालिनी वृत्तमस्ति।

शिखरिणी छन्दः

लक्षणम्

"रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।"

यस्य चतुर्षु पादेषु यमनासभलागः यगण-मगण-नगण-सगण-भगणाः लघुः गुरुश्च स्यात्, रसैः षड्भिः, रुद्रैः एकादशभिश्च वर्णैर्यतिः स्यात्, तदेव शिखरिणी नाम वृत्तं भवति। वृत्तमिदं सप्तदशाक्षरावृत्तिरत्यष्टि इत्यस्य भेदः।

उदाहरणम्

करे श्लाध्यत्यागः शिरसिगुरुपाद प्रणयिता
मुखे सत्यावाणी, वजयीभुजयोर्वीर्यमतुलम्।
हृदि स्वच्छावृत्तिः श्रुतमधिगतं च श्रवणयोः
विनाऽप्यैश्वर्येण प्रकृति महतां मण्डनमिदम्।।

अत्र प्रत्येकस्मिन् चरणे यगण-मगण-नगण-सभण-भगणानन्तरं लघुश्चैकः गुरुश्चैको वर्णः क्रमानुसारं वर्तते, षड्भिरेकादशभिश्च वर्णैर्यतिरस्तीति शिखरिणी नाम वृत्तम्।

मन्दाक्रान्ता छन्दः

लक्षणम्

"मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्।"

यस्य चतुर्षु चरणेषु क्रमेणः मगणः भगणः नगणः तगणः तगणः गुरुद्वयञ्च स्यात्, तदेव मन्दाक्रान्ता नाम वृत्तं कथ्यते। अस्मिन् अम्बुधिरसनगैः चतुर्भिः षड्भिः सप्तभिश्च वर्णैः यतिर्भवति।

उदाहरणम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्
विश्वाधारं गगनसदृशं मेघवर्णं सुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम
वन्द्र विष्णुं भवभयहरं सर्वलोकैकनाथम्।।

अत्र चतुर्षु चरणेषु क्रमेण मगण-भगण-नगण-तगण-तगण भवति, चतुर्भि, षड्भिः, सप्तभिश्च वर्णेयतिर्भवति। अतो हि मन्दाक्रान्ता नामकं वृत्तम।

हरिणी छन्दः

लक्षणम्

"नसमरसला गः षड्वेदैर्हयैर्हरिणीमता।"

यस्य सर्वेषु पादेषु नगणः सगणः मगणः रगणः सगणः लघुः गुरुश्च वर्णो भवेत्, तदेव हरिणी नाम वृत्तम्। अस्मिन् षड्भिश्चतुर्भिः सप्तभिश्च अक्षरैर्यतिः क्रियते।

उदाहरणम्

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः समोहो मे तदा बलवानभूत्।
प्रवलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया।।

अत्र सर्वेषु पादेषु नगण-सगण-मगण रगण-सगण क्रमेण भवति षड्भि चतुर्भि सम्तमिश्च अक्षरैचीत भवति। अतो हि. हरिणी नामक वृत्तम।

शार्दूलविक्रीडित छन्दः

लक्षणम्

"सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।"

यस्य चतुर्षु चरणेषु क्रमेण मगणः सगणः जगणः सगणः तगणः तगणस्ततश्चैको गुरुवर्णः स्यात्, तदेव शार्दूलविक्रीडितं नाम वृत्तम। अस्मिन् सूर्याश्वैः सूर्यैः द्वादशभिः, अश्वैः सप्तभिश्च वर्णैर्यतिः क्रियते। इदमूनविंशत्यक्षरा-वृत्तिमध्ये अतिधृतिभेदतया गण्यते।

उदाहरणम्

पातुं न प्रथमं व्यवस्य तिजलं युष्मास्व पीतेसु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्येः बः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

उक्तोदाहरणे क्रमेण मगण-सगण-जगण-सगण-तगणद्वयान्तरं गुरुवर्णश्चैको वर्तते, द्वादश-सप्तभिर्वर्णैर्यतिः। अतोऽत्र शार्दूलविक्रीडितं नाम वृत्तमस्ति।

स्रग्धरा छन्दः

लक्षणम्

"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्"।

यस्य वृत्तस्य सर्वेषु चरणेषु क्रमेण मगणः रगणः, भगणः, नगणः यगणत्रयञ्च भवेत्, त्रिमुनियति-युता सप्त-सप्त-सप्तमिश्च यतियुता भवेत, तदेव स्रग्धरा नाम वृत्तम्। इदं चैकविंशत्यक्षरा-वृत्तेर्भेदः।

उदाहरणम्

या सृष्टिः स्रष्टुरा द्यावहतिविधि हुतंयाहविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा, या स्थिता व्याप्यविश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यथा प्राणिनः प्राणवन्तः,
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।

अत्रोदाहरणे प्रत्येकस्मिन् चरणे क्रमानुसारं

मगण-रगण-भगण-नगण-यगणत्रयस्य वर्णयोजना वर्तते। सप्त-सप्तभिश्च वर्णैर्यतिरपि वर्तते।

अतोऽत्र स्रग्धरा नाम वृत्तमस्ति।

अलंकार

"अलङ्क्रियते अनेन इति अलङ्कारः" अर्थात् अलंकार रसाद्युत्कर्षजनकत्वे सति शोभातिशासित-काव्यधर्मत्वम् अलङ्कारत्वम्। उक्तं च काव्यप्रकाशस्य अष्टमोल्लासे मम्मटेन

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलंङ्कारास्तेऽनुपगासोपमादयः।।

यथा हारादयः कण्ठाद्यङ्गानाम् आत्मनश्च अतिशयाधानद्वारेणोपकारकाः तथैव शब्दार्थद्वारेण ये धर्मा कदाचित् अङ्गिनं रसम् उपकुर्वन्ति, ते अनुप्रासोपमादयः 'अलङ्कार' पदेन उच्यते। काव्ये शब्दार्थहारेण रसादेरूपकारकत्वम् एवं तेतेषां मुख्यं प्रयोजनम्

इत्थम् अलङ्कारविषये विषयत्रयम् अवधातव्यम्

- काव्ये अलङ्काराः शब्दार्थरूपी अङ्गानां शोभाधायकाः भवन्ति, किन्तु परम्परया आत्मभूतं मुख्यं रसमपि उपकुर्वन्तिः तद्यथा-**अपसारय घनसारं" वदति दिवानिशं बाला।**
  अत्र अनुप्रासालङ्कारेण विप्रलम्भशृङ्गाररसस्य उत्कर्षाधायकत्वं वर्णितम्।
- यत्र रसः नास्ति तत्र अलङ्कराः उक्तिवैचित्र्यमात्र बोधका भवन्ति। यथा
  चित्ते विघटते न त्रुट्यति .... चिरं तरुणी प्रगल्भा।
  अत्र रसस्योपकारकत्वं नास्ति, उक्ति वैचित्र्यमात्रमेव।
- क्वचितु विद्यमाने रसेऽपि नोपकुर्वन्ति, तद्यथा
  मित्रे क्वापि गते सरोरुहवने ....जीवस्य निर्गच्छतः।
  अत्र रसस्य प्रतिकूलोपमालङ्कारः वर्तते।

अलङ्कारस्तु त्रिविधः

- शब्दगतः, यथा–यमकानुप्रासादयः।
- अर्थगतः, यथा–उपमारूपकादयः।
- शब्दार्थागतः, यथा–पुनरुक्तवदाभासश्च।

अलङ्काराणां संख्याविषये आचार्याणां मतैक्यं न दृश्यते। मम्मटमते 67, रुय्यकमते 78, विश्वनाथमतेऽपि 78, जयदेवमते 100, अप्पयदीक्षितमेषु 120, अलङ्काराः सन्ति।

अलंकाराणां वर्णनं

पाठ्यक्रमानुसारम् अत्र अलंकाराणां वर्णनं प्रस्तूयते

वक्रोक्ति-अलंकारः

कथितस्य वाक्यस्य श्लेषेण अथवा काक्वा अन्य एवार्थः कल्पितो भवेत् तत्र वक्रोक्तिर्भवति। वक्ता कस्मिन् अन्य एवार्थः कल्पिती भवेत् तत्र वक्रोक्तिर्भवति। वक्ता कस्मिन् एकस्मिन् अर्थे वाक्यस्य प्रयोगं करोति तथा श्रोता तस्य अपरमर्थमवगत्य कथनं करोति। तत्रायं चमत्कारी अलंकारो भवति। वक्रोक्तेः इयं सीमित कल्पना रुद्रटेन कृताऽस्ति। कुन्तकद्वारेण एषा एव वक्रोक्तिः एकस्य व्यापकस्य काव्यतत्त्वस्य प्रतिनिधित्वं करोतिः

उदाहरणम्

धन्या केयं स्थिता ते शिरसि शशिकला किन्नु नामैतदस्या,
नामैवास्यास्तदेतत् परिचितमपि ते विस्मृतं कस्य हेतोः।
नारा पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-,
देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः।।

अनुप्रास-अलंकारः

"वर्णसाम्यमनुप्रासः"

वर्णानां साम्यम् अनुप्रासालङ्कार इत्युच्यते।
वर्णसाम्यम् स्वरवैसादृश्येऽपि व्यञ्जनसादृश्यम्।

अनुप्रासः रसाद्यनुगतः प्रकृष्टो न्यासः, अर्थात् रसाद्यनु-कूलवर्णानां सन्निवेशः।

- ***छेकानुप्रासः*** "सोऽनेकस्य सकृत्पूर्वः"

  अनेकवर्णानां एकवारं साम्यं भवति।
  तद्यथा ततोऽरुणपरिस्पन्द मन्दीकृतवपुः शशी।

  अत्र 'स्पन्द-मन्द' 'कामकामिनी' 'गण्ड-पाण्डु' इत्यादीनाम् अनेकवर्णानाम् एकधा आवृत्तिः भवति।